पृष्ठे विरावं मधुरं विमुञ्च-
न्ननुव्रजंश्चापि मतो हिताय ।
प्रायेण यातारमनुव्रजन्तः
सर्व्वेऽपि काकैः कथिता विहङ्गाः ॥
कृत्वा रवं यः पुरतः प्रयाति
उपस्थितो यो मुदमादधाति ।
कण्डूयते यः स्वशिरोऽङ्घ्रिणासौ
पुंसां तदाभीष्टफलं ददाति ॥
स्तम्भे गजानां नियतं गजाप्तिं
गजेऽधिरूढः पृथिवीपतित्वम् ।
तुरङ्गमे वाहनभूमिलाभं
करोति काको विजयं ध्वजेन ॥
प्रशस्तलाभं विजयं च कूपे
क्षिप्रं नदीरोधसि कार्य्यसिद्धिम् ।
पूर्णे घटेन्द्रे च धनाप्तिवृद्धिं
ध्वाङ्क्षोऽधिरूढः कुरुते सशब्दः ॥
प्रासादधान्योच्चयहर्म्यपृष्ठ-
निष्पन्नशस्यावनिशाद्वलादौ ।
ध्वाङ्क्षोऽधिरूढो धनसाधनाय
रौति श्रियं यच्छति युग्मरावः ॥
पृष्ठे पुरो वा यदि गोमयस्थो
तथा वटाद्येषु तरुष्वपीह ।
स्थितो रुवन् भोजनपानमिष्टं
विष्ठां च कुर्व्वन् वितरत्यवश्यम् ॥
अन्नाद्यविष्ठाफलमूलपुष्प-
मत्स्यादिभिः पूर्णमुखः सदैव ।
संदृष्टमात्रोऽभिमतार्थसिद्धौ
मिष्टान्नभोज्याय सदैव काकः ॥
नारीशिरःपूर्णघटस्थितस्य
काकस्य शब्दैर्व्वनिताधनाप्तिः ।
शय्याधिरूढस्य च तस्य शब्दैः
समागमः स्यात् सुजनेन सार्द्धम् ॥
गोपृष्ठदूर्व्वातृणगोमयेषु
तुण्डानि घर्षन्नवलोकितश्चेत् ।
आहारमन्यस्य तथा ददानो
ददाति भोज्यं बलिभुग्विचित्रम् ॥
धान्यं यवं वा दधि वापि चाज्यं
विरौति पश्यन्निधिलाभकारी ।
करोति लाभं पुरतः स दृष्टो
यस्यास्ति वक्त्रे तृणमप्यशुष्कम् ॥
वृक्षेषु रम्याङ्कुरपत्रपुष्प-
च्छायाफलाढ्येषु सदा व्रजस्य ।
शब्देन सिध्यन्त्यचिरान्नराणां
सदैव सर्व्वाणि समीहितानि ॥
प्रशान्तनादः शिखरे तरूणां
स्त्रीसङ्गसौख्यं करटोऽभिधत्ते ।
धान्यादिकूटेषु तथान्नलाभो
गोपृष्ठगो गोवनिताधनाप्तिम् ॥
क्षेमं विधत्ते करभस्य पृष्ठे
खरस्य पृष्ठेऽरिभयं वधञ्च ।
क्रोडस्य पृष्ठे वधमर्थलाभं
तस्यैव पृष्ठे घनलमपङ्के ॥

सद्यो ज्वरं सैरिभपृष्ठसंस्थो
मृताङ्गसंस्थो मरणं करोति ।
कार्य्यक्षतिं रिक्तघटस्य संस्थः
काकः कलिं काष्ठमधिष्ठितश्च ॥
यो दक्षिणं कूजति दक्षिणेन
प्रयाति यश्चाभिमुखोऽभ्युपैति ।
यो याति पृष्ठे प्रतिलोमगत्या
कृतारवः पातयते स रक्तम् ॥
वामे रवो दक्षिणतस्ततो यः
सोऽनर्थहेतुर्ब्बलिभोजनस्य ।
वामप्रदेशे प्रतिलोमयानं
विघ्नाय लाभो गृह एव तेन ॥
प्रयाति पृष्ठे यदि दक्षिणेन
कृतारवस्तद्रुधिरं पुरः स्यात् ।
वल्मीकरन्ध्रादि च यो गृहीत्वा
प्रदक्षिणं याति स सर्पभीत्यै ॥
गोपुच्छवल्मीकलतास्पदस्थ
रुवन् भवेत् सर्पविलोकनाय ।
स्यान्मृत्यवेऽङ्गारचितास्थिसंस्थः
काकः प्रकुर्व्वन् करचर्व्वणं च ॥
रुवन् पुरो हानिरुजौ करोति
मृत्युं पुनर्निष्ठुरपृष्ठशब्दः ।
प्रसार्य्य रिक्तं वदनं य आस्ते
सर्व्वत्र निन्द्यो बलिभोजनोऽसौ ॥
वामोऽप्यकस्माद्गतभयं मृतिं वा
संताड़यित्वा रसचर्म्मखण्डम् ।
चञ्च्वास्थिभङ्गं ध्रुवमस्थिभङ्ग-
बन्धे वधं जल्पति युध्यमानः ॥
वामोऽपि रोगं कुरुते विशुष्के
तिक्तेऽपि वृक्षे कलिकार्य्यनाशौ ।
पक्षौ विधुन्वन् विरुवंश्च रूक्षं
सकण्टके मृत्युमुपाददाति ॥
वधो भवेद्भूरुहभग्नशाखे
बन्धो लताभिः परिवेष्टिते स्यात् ।
रम्ये तरौ कण्टकयुक्तवृक्षे
सदा भवेतां कलिकार्य्यसिद्धी ॥
कन्याधिरूढो न रवेण यायात्
प्रयाति चेत् स्यात् खलु रक्तपातः ।
अवस्करं भूस्तृणकाष्ठकूप-
भस्मादिसंस्थो विनिहन्ति कार्य्यम् ॥
वल्लीवरत्राकचशुष्ककाष्ठ-
चर्म्मास्थिजीर्णाम्बरवल्कलानि ।
अङ्गाररक्तोत्पलकर्परादि
दृष्टानि चेत् काकमुखे तदानीम् ॥
पुण्यक्षयः पापसमागमश्च
महद्भयं रोगसमुद्भवश्च ।
बन्धो वधः सर्व्वधनापहार
इत्यादिकं स्यात् पथि मन्दिरे च ॥
ऊर्द्धाननश्चञ्चलपक्षयुग्मः
काकः कुनादो विदधाति मृत्युम् ।
छायायुधच्छत्रघटास्थियान-
वादित्रकाष्ठादिककुट्टकानि ।

सङ्कोचितैकाङ्घ्रिरपेतवित्तो
दीप्तस्वरो भास्करमीक्षते च ।
काष्ठादिकं कुट्टयतेऽथवा यो
युद्धाधिकानर्थकरः खगोऽसौ ॥
तुण्डेन पिच्छं विलिखन् रवेण
यो रौति तूर्णञ्च निरीक्षते कम् ।
एकेन पादेन तथोपविष्टो
ब्रूते स बन्धं पुरतो जनस्य ॥
विड्लोमयौ न्यस्यति यस्य मूर्द्धि
तस्यानलत्रासरुजौ भवेताम् ।
यस्यास्थिखण्डं विसृजत्यसौ तु
प्रयाति तूर्णं नगरीं यमस्य ॥
शय्याप्रदेशे विरुवन् यियासोः
कलत्रदोषं जनयत्यवश्यम् ।
मनुष्यमातङ्गतुरङ्गमाणां
शिरोऽधिरूढो निधनाय तेषाम् ॥
नदीतटे वाथ रटन्नटव्यां
खरस्वरो व्याघ्रभयाय गन्तुः ।
नैवातुरः क्वापि मतो हिताय
न दुष्टचेष्टो वितनोति शान्तिम् ॥
यात्रोद्यमे सैन्यवधाय काको
दृष्टो रथे साश्वन्टमस्तकेषु ।
आयाति यस्याभिमुखो बलस्य
युद्धोद्यमे तस्य पराजयः स्यात् ॥
सम्प्रकाशैः कटके नृपस्य
काकैः प्रविष्टैः पिशितं विनापि ।
संयुध्यमानैरिरिभिः समं स्या-
न्महाहवः सन्धिरयुध्यमानैः ॥
चिह्नध्वजच्छत्रलताधिरोहः
समुद्यतं शत्रुबलं प्रपश्यन् ।
आशौ जयं जल्पति भूमिपानां
कृतध्वनिः क्षीरतरौ च काकः ॥
गतिस्वरौ वायससंप्रयुक्तौ
प्राच्यां फलायोदितवैपरीत्यात् ।
एवं जनोऽप्याचरति प्रभूतौ
यथोदितं तत्र तथागमार्थम् ॥
दिग्यामचक्रेऽपि शुभाशुभानि
फलानि यानि प्रतिपादितानि ।
प्रतिष्ठमानस्य भवन्ति यानि
तथाविधानीति वदन्ति तज्ज्ञाः” ॥
इति काकरुते यात्राप्रकरणम् ॥ * ॥
“स्थानस्थितानां कथयन्ति काका-
श्चेष्टाविशेषेण शुभाशुभानि ।
प्रबोधिताः प्राक्तनकर्म्मभिर्ये
तल्लक्षणाय क्रियते प्रयत्नः ॥
निष्कारणं संवलिता रुवन्तो
ग्रामेऽन्ननाशाय भवन्ति काकाः ।
रोधञ्च चक्राकृतयो वदन्ति
सव्यापसव्यभ्रमणाद्भयञ्च ॥
विघातमाऊर्व्वेऽङ्कवर्गसंस्था
रात्रौ रुवन्तो जनताविनाशम् ।
लोकञ्च चञ्चूचरणप्रहारै-